JOURNAL
OF THE
ORIENTAL INSTITUTE

M. S. UNIVERSITY OF BARODA, BARODA

Edited by

B. J. Sandesara

DIRECTOR, ORIENTAL INSTITUTE

DR. BENOYTOSH BHATTACHARYA MEMORIAL NUMBER

THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

Oriental Institute

BARODA

Vol. XIV] March-June, 1965 [Nos. 3-4

APARṆĀKHILĀṄGAVARṆANAM OF VEṆĪDATTA

By

K. V. SARMA, Hoshiarpur

The *Aparṇākhilāṅgavarṇanam* is a panegyric in 28 well knit verses by Veṇīdatta, son of Bhogī, on Goddess Aparṇā (Pārvatī). Even as the title implies, the verses are devoted to the description of the exquisite charm of the different parts of the physical frame of the Goddess : the nails, feet, shanks, thighs, waist, seat, *romāvalī*, *valitrayī*, breasts, palms, fingers, arms, neck, face, teeth, laughter, lip, speech, cheeks, ears, nose, eyes, eyebrows, forehead and tresses of hair. The descriptions follow the stereotyped norms found in the *Keśādi-pāda-varṇana* works of later Sanskrit literature. The poet is a master of words and his verses have an easy flow, but at times the meanings intended are a little difficult to grasp, for the poet indulges in figures of speech, both of the sound and the sense.

The work is edited here from its only known manuscript preserved in the Kerala University Manuscripts Library, No. 1619. This is a paper manuscript in 8 folios, 13 cm × 4 cm., in very readable Devanāgarī script. The work is complete in the manuscript which is dated Saṁvat 1930 (A.D. 1873) in a post-colophonic statement : *iti Veṇīdattakaviracitam Aparṇākhilāṅgam. Saṁva. 1930. Asvavadī Amāvāsyāyām sāye.*[1]

A short *Ṭippaṇī* is added to the edition to facilitate the easy grasp of the sense of the verses, especially of the more terse ones.

Veṇīdatta and His works[2]

Veṇīdatta gives his genealogy in the concluding verse of his *Aparṇākhilāṅgavarṇana*. He was the son of Bhogī, grandson of Vāsudeva and great grandson of Lauha.[3]

आसील्लौहाभिधानाद् द्विजवरतिलकाद् वासुदेवाभिधान-
स्तत्सूनोर्भोगिनाम्नोऽभवदतुलमतिर्वेणिदत्ताभिधानः ।
सोऽयं चक्रेऽङ्गकानां शरदिजशशभृच्चारुसूक्तीः स्तुतीर्या-
स्ता भूमीमण्डले सत्सदसि परिचिताः सन्तु गोत्रेन्दुजायाः ॥

---

[1] Thanks are due to the authorities of the Kerala University Mss. Library for permission to use the munuscript for this study and edition.

[2] For a detailed account, see the present writer's paper, 'Veṇīdatta, son of Bhogī : His date and works', *Proc. of the 13th All-India Oriental Conference*, 1946, Nagpur, Pt. II. 156–63.

[3] Our author has to be distinguished from his namesakes :

(i) Veṇīdatta, son of Jagajjīvana and grandson of Nīlakaṇṭha, author of *Pañcatattvaprakāśa* (CC I. 314a : Ms, L. 1436), *Padyaveṇī* (ed.

Aufrecht notices in his *Catalogus Catalogorum* only one work of our author, *viz.* the *Bhāvārthadīpikā*, a commentary on the *Śataślokī*, a work on medicine by Bopadeva (CC I. 631b, being Burnell 67a, described in the Descriptive

J. B. Chaudhury, Calcutta, 1944) and *Vāsudevakathā* (CC III. 120a: Ms. IO 3877).

(ii) Veṇīdattaśarman Tarkavāgīśa Bhaṭṭācārya, son of Vīreśvara Śrīvara and grandson of Lakṣmaṇa of the Nāgacchatra family (on him, see G. V. Devasthali, Veṇīdattaśarman and his *Rasikarañjinī*, *New Ind. Ant.* 5 (1942), 193-200). He was a prolific writer, author of: *Alaṅkāracandrodaya* (Ms. IO 1198), *Bhāgavataprakramaprakaraṇa* (mentioned by Devasthali, *ib.*), *Rasikarañjinī*, commentary on Bhānudatta's *Rasataraṅgiṇī* (CC I. 494b: Ms. IO 1216) *Muktivimarśa* (*CC* III. 99a: Ms. Bd. 661), *Padārthamaṇḍanam* (ed. *Sarasvati Bhavana Texts* 30, Banaras, 1930), *Annapūrṇāṣṭakastotra*, *Āsvādasundaraprakaraṇa*, *Tarkadhundhadhvaṁsana* (Ms. Sar. Bh. 31979), *Nirvikalpabhaṅga* (Ms. Sar. Bh. 31965), *Nyāyasiddhāntarakṣāmaṇi*, *Nyāyāmṛtataraṅgiṇī-kaṇṭakoddhāra*, *Parāmarśavimarśa* (Ms. Sar. Bh. 32592), *Yuktivarūdhinī*, a commentary on *Vipakṣavikṣepa* (the last eight works being mentioned in the Introduction to the edn. of *Padārthamaṇḍana*), *Bhedajayaśrī* (ed. *Sar. Bh. Texts* 47, Banaras, 1933), *Kālīstotra*, *Vākyārtharatna* (these two being mentioned in the edn. of *Bhedajayaśrī*) and possibly also *Nañarthanirṇaya* (Ms. Sar. Bh. 31964).

(iii) Veṇīdatta, son of Jagannātha, author of *Rasakaustubha* (Ms. K. P. Jayaswal, *A Des. Cata of Mss. in Mithila*, II. pp. 44 ff.)

(iv) Veṇīdatta, son of Nandapaṇḍita and grandson of Rāmapaṇḍita, author of *Bālabhūṣā*, a commentary on his father's *Tattvamuktāvalī* (Ms. Madras Or. Mss. Lib., R. 1684).

(v) Veṇīdatta of the Yājñikavaṁśa, father of Gopīkānta, author of *Nyāyadīpikā* (Ms. Lal Mitra, Notices, 2913)

The undermentioned Veṇīdattas could not be identified fo lack of any information beyond their names:

(i) Veṇīdatta, author of *Audīcyaprakāśa* (*CC* I. 76b: Ms. B. 3.74).

(ii) Veṇīdatta, author of *Śaivaparākrama-prakaraṇa* (*CC* III. 137b: Ms. Ak 589).

(iii) Veṇīdatta, father of Paramānanda Pāṭhaka Daivajña, author of *Praśnamāṇikyamālā* (Mss. M.A. Stein, *Cata. of Skt. Mss. at Jammu*, p. 166; Sar. Bh. 34748, 36387, 36518).

(iv) Veṇīdatta who "wrote a dictionary in 1644 and a biography of Vāmadeva". (Sri Ram Sharma, *A Bibl. of Mughol India*, p. 165).

Catalogue of Skt. Mss. of the Sarasvati Mahal Library, Tanjore, as No. 11141) where, too, the author gives his parentage in the introductory verse:

वासुदेवसमुद्भूतभाग्यभृद्भोगिसूनुना ।
शतश्लोकीविवरणं वेणीदत्तेन तन्यते ॥

A post-colophonic verse in this manuscript extols in high terms the attainments of Veṇīdatta in the different systems of knowledge:

तर्के दुस्तर्कयुक्तिर्निखिलनयकृतौ कल्पनाकोविदेन्द्र-
स्सङ्गीतज्ञानरङ्गः श्रुतिपठनशुचिस्सर्वचातुर्यचुञ्चुः ।
ज्योतिश्शास्त्राग्रगण्योऽग्रगणितगणितो वैद्यविद्यानवद्य-
स्साहित्ये सार्वभौमो जगति विजयते वेणिदत्तः कवीन्द्रः ।

A third work of Veṇīdatta which has come to light is his *Sāhityābdhi*, a tract in 37 verses composed in diverse metres illustrating the different types of heroines as classified in Sanskrit works on poetics. This work too is represented by its single exemplar, preserved in the Sarasvati Mahal Library, Tanjore, (Ms. No. 5312) and is edited by P. V. Varadaraja Sarma in the *Journal* of the Library (III (1943) ii-iii. 18-22). Here too, before the commencement of the work proper is a verse in the same tenor as the verse *tarke dustarkayukti* etc. quoted above:

किं कान्ताकटिकिङ्किणीकलकलैः किं कीरकर्णामृतैः
किं वा कोकिलकूजितैः किमतनोः कोदण्डखण्डारवैः ।
किं वा तैर्विलसद्विरिञ्चवनितावीणारवाडम्बरै—
र्वेणीदत्तकवेर्विदग्धकविता यद्यस्ति किं वापरैः ॥

The introductory verse naming the author and giving his genealogy confirms the identity of its author with our Veṇīdatta:

वासुदेवसमुद्भूत भाग्यभृद्भोगिसूनुना ।
वेणीदत्तेन कविना साहित्याब्धिर्विरच्यते ॥

Apart from these three complete works, six verses of Veṇīdatta are found in the well known anthology *Padyaracanā* of Lakṣmaṇa Bhaṭṭa, quoted with the subscription *Bhogi-sūnor Veṇīdattasya* the father's name being given, perhaps, to distinguish him from his namesakes.[4] All these verses are *muktakas*. One of them appears to give the name of Veṇīdatta's patron as a King Harisiṁha. This verse occurring in the section dealing with royalty, war etc. reads:

शत्रुवीरसदृशोऽनुघस्रमाख्यापदेन हरिसिंह नाम ते ।
मोहिता हरिहरीति चक्षते रूपशौर्यबलसंहितैर्गुणैः ॥ III. 2 ॥

The identification of this Harisiṁha would be possible only when more details are available.

---

[4] Edn. *Kāvyamālā Series* 89, Bombay, 1908. The verses quoted are: I. 36-37; II. 22, 28; III. 2, 25.

Date of Veṇīdatta

The reference to Veṇīdatta in the *Padyaracanā* would enable us to fix the lower limit of his date as about A.D. 1600, a little before when Lakṣmaṇa Bhaṭṭa wrote his work.[5] The upper limit is supplied by the date of Bopadeva whose *Śataślokī* is commented upon by Veṇīdatta. Bopadeva was a protege of Hemādri, the reputed jurist and compiler of *dharma*-digests during the latter half of the 13th and beginning of the 14th century A.D.[6] The date of Veṇīdatta would, therefore, lie between A.D. 1300 and 1600.

---

[5] See P. K. Gode, 'Date of *Padyaracanā* of Lakṣmaṇabhaṭṭa Ānkolkar—Between A.D. 1625 and 1650', *Journal of Research* 14 (1941) 184-93; J. B. Chaudhury, 'Lakṣmaṇabhaṭṭa,' *Indian Culture* 9 (1943) 215-26.

[6] See P. V. Kane, *History of Dharma-Śāstra*, vol. I, pp. 356-57.

वेणीदत्तकविकृतं

अपर्णाखिलाङ्गवर्णनम्

नखादिवर्णनं श्रीमद्-वेणीदत्तो यथामति
छन्दोभिर्विविधैश्चक्रे पार्वत्या विविधोक्तिभिः ॥ १ ॥

तत्रादौ नखाः—

भूत्यै भवन्तु भवतां गिरिराजकन्या-
पादाम्बुजाग्रनखरोस्रसहस्रवाराः ।
यत्सम्परीतशिखरीन्द्रसुताप्रतीक-
व्यक्तिं न गच्छति कदापि महेश्वरोऽयम् ॥ २ ॥

अथ पादौ—

विन्याससन्नमदिलादलितोरगेन्द्र-
हाहारवक्षयसमागमितोरुनिद्रम् ।
शौरिस्मितं हि दिशती नयतां मुदं व-
श्चण्डं प्रतिद्रुतहिमाद्रिसुतापदाब्जे ॥ ३ ॥

जङ्घे—

जङ्घे सुखं सुखकरे कुरुतां हि तस्या
मञ्जीररत्नकिरणैरुपशोभिते ते ।
ये सम्प्रवीक्ष्य वशमेति झषध्वजस्य
तत्कालमेव गिरिशो जितमन्मथोऽपि ॥ ४ ॥

ऊरू—

ऊरू पुनीतां नगसम्भवायाः
कान्तं मनोजावसथं पताकाम् ।
आरोपितुं पद्मभवेन कान्तौ
स्तम्भाविवोच्चैरभितः कृतौ वः ॥ ५ ॥

---

2 गिरिराजकन्यायाः पादाम्बुजाग्रनखरेभ्यः प्रसृतानाम् उस्र(किरण)-सहस्र-वाराणां (समूहानां) ज्योतिःप्रसरेण तस्या अङ्गानां व्यक्तिं महेश्वरः 'महेश्वरः' सन्नपि न सम्यग् द्रष्टुं प्रभवतीत्यर्थः ।

3 चण्डमसुरं निग्रहीतुं प्रतिद्रुतवत्यां देव्यां तस्याः पदविन्यासेन सन्नामितया इलया (भुवा) दलितेन उरगेन्द्रेण (शेषेण) कृतहाहारवेण क्षयं समागमिता उर्वी निद्रा यस्य तस्य शौरेः स्मितं दिशती हिमाद्रिसुतापदाब्जे वः मुदं नयताम् इत्यन्वयः ।

4 मञ्जीरः नूपुरः । स्पष्टोऽर्थः ।

5 अद्रिसुताया ऊरू मनोजमन्दिरे पताकाम् आरोपयितुं पद्मभवेन (ब्रह्मणा) निर्मितौ स्तम्भाविवुत्प्रेक्षते कविः ।

जघनम्—

तनोतु कामं जघनस्थली वः
कान्ता घनोर्वीधरसम्भवायाः ।
जिता ययेवाऽऽवनिमाश्रयन्ति
जाड्यं भजन्त्यो दृषदः समस्ताः ॥ ६ ॥

नितम्बौ—

नितम्बिपुत्र्या विपुलौ नितम्बौ
तौ वः प्रमोदं तनुतां मृदूच्चौ ।
जिता इवाद्रेः कटका नितान्तं
शून्यत्वमद्यापि वहन्ति याभ्याम् ॥ ७ ॥

अथ रोमावली—

शर्माणि निर्मातु नगेन्द्रजाया
वस्तन्विका मेचकरोमराजिः ।
विनिर्गता व्यालनितम्बिनीवा-
ऽधरामृतार्थं नतनाभिकूपात् ॥ ८ ॥

वलित्रयी—

वलित्रयी पीनकुचौ समीक्ष्य वः
कृशावलग्नान्तरभङ्गशङ्किना ।
गुणत्रयी त्राणकृते सुसंयता
चतुर्मुखेनेव तनोतु मङ्गलम् ॥ ९ ॥

मध्यम्—

तनोतु तस्याः प्रमदं सुमध्यमं
नितान्तवक्षोजभरान्तरस्थितम् ।
स्वशिल्पचातुर्यभरं प्रदर्शितुं
कृशं त्वभङ्गं विहितं तु वेधसा ॥ १० ॥

---

6 नगसम्भवाया (पार्वत्या) जघनस्थल्या जिता इव दृषदः (शिलाः) जडीभूत्वा अवनिमाश्रयन्तीति भावः ।

7 नितम्बि(पर्वत)पुत्र्या नितम्बाभ्यां पराजिता इव अद्रिकटकाः सम्प्रत्यपि शून्याः (अतिशयेन ऊना रिक्ता वा) सन्तीत्यभिप्रायः ।

8 नूनं देव्या रोमावलिः तस्या नाभिकूपाद् विनिर्गत्य अधरामृतपानार्थं उद्गच्छन्ती व्याली इति शङ्कते कविः ।

9 पीनकुचभारेण कृशस्य अवलग्नस्य (कटि प्रदेशस्य) मा भूद् भङ्ग इति तत्त्राणार्थं चतुर्मुखेन देव्या वलित्रयी गुणत्रयी (रज्जुत्रयं) सम्बद्धेति निष्कृष्टोऽर्थः ।

10 स्पष्टोऽर्थः ।

स्तनौ—

यत्साम्यं भजत इमानिभेन्द्रकुम्भान्
सादृश्यादिव महतोः श्रयन्ति मुक्ताः ।
औदार्यं किमु कुचकुम्भयोर्मृडान्या
वर्ण्यं वै तदुत नु वस्तनोतु कामम् ॥ ११ ॥

अथ करौ—

सुकरौ करौ विनयतां नयतां
परितोऽरितोऽवितनुतां तनुताम् ।
अककस्य कस्य भवतां भवतां
हि कृते कृतेन्द्रशरणौं शरणौ ॥ १२ ॥

अथाङ्गुल्यः—

उद्गता करवृक्षस्य शाखा इव मनोहराः ।
अङ्गुल्यो हैमवत्या वश्चिन्तितानि ददत्वरम् ॥ १३ ॥

बाहू—

बाहू तौ विजितमहोजसौ शिवाया
दत्तां वः सुखमतुलं गतानुयातौ ।
यत्साम्यं जडमतयो वदन्ति वध्रीं
दूराद् वा घनरुचिना भृशं प्रतप्ताम् ॥ १४ ॥

कण्ठः—

कण्ठः स कस्य प्रमदं न कुर्यान्
मुक्ताफलान्याश्रयतीव योऽर्थम् ।
मुक्तेति नाम्नः सदयं समीक्ष्य
धाराधराधारधराङ्गजायाः ॥ १५ ॥

---

11 मृडान्या कुचकुम्भयोरन्तराले मुक्तावलीं दृष्ट्वा तत्सादृश्यप्रापणार्थमेव मुक्ताः इभेन्द्रकुम्भान् प्रविष्टा इत्यभिप्रैति कविः ।

12 देव्याः सुकरौ (सुखप्रदौ) करौ वि-नयतां (दुर्नीतिं) नयतां (दूरीकुरुताम् ।) अरितः (शत्रुतः) अ-वितनुतां (मरणाभावरूपं मङ्गलं) परितः तनुताम् । अ-ककस्य (अ-चलस्य, स्थायिनः) कस्य (सुखस्य) (हेतू) भवताम् । कृते (कृतयुगे) कृतेन्द्रशरणौ (इन्द्रस्य शरणभूतौ) शरणौ भवताम् इत्यन्वयः । अत्र ' शरणौ ' इति पुंसि प्रयोगश्चिन्त्यः ।

13 निगदव्याख्यानम् ।

14 गतस्य (पलायितस्य, अरेः) ग्रहणार्थम् अनुयातौ देव्या दीर्घौ बाहू घनरुचिना (दीप्तरश्मिना, सूर्येण) भृशं प्रतप्ता वध्री इवेति जडमतयो वदन्ति इत्यभिप्रायः ।

15 धाराधराणां (मेघानां) आधारधरस्य (आश्रयभूतस्याद्रेः हिमवतः) अङ्गजायाः (पुत्र्याः) कण्ठः मुक्ता इति नाम्नः (परित्यक्ता इति) अर्थं सदयं समीक्ष्य मुक्ताफलान्याश्रयति इत्यन्वयः ।

मुखम्—

यदुग्रश्रिया निर्जितस्तारकेशः
कलङ्कं दधातीव किं तत्प्रमार्ष्टुम् ।
तदादीश्वरं संश्रयत्येष दुःखान्-
मुखं हैमवत्या मुदं वो विदध्यात् ॥ १६ ॥

दन्ताः—

विजित्यौषधीशं ततस्तारकालीं
बहोर्मत्सरात् तारकारातिमातुः ।
मुखेनेव बन्दीकृता सर्वदेयं
द्विजाली प्रसत्तिं तनोत्वादराद् वः ॥ १७ ॥

हास्यम्—

श्वासामोदाननाब्जान्तिकगतमसृणत्रिद्वयाङ्घ्रिप्रयुद्धात्-
तत्सौरभ्याकुलत्वेक्षणसमुदयदस्तोकहास्यं मृडान्याः ।
आनन्दं वो विधत्तां स्वजितसमकलत्पङ्कलक्ष्माङ्कसाम्या-
धिष्ठानज्ञापिताल्पेतरहृदयसरोजातदुर्ज्ञेयभावम् ॥ १८ ॥

अधरः—

सम्भाषणादौ कृतसंविभाग-
मुपर्यवस्थं स्वतुलामयातम् ।
ओष्ठं प्रतीव स्फुटबद्धरोषो
रक्तोऽधरो वः प्रतनोतु लक्ष्मीम् ॥ १९ ॥

अथ वाणी—

वाणी तनोतु सुषमां पुरवैरिपत्न्याः
सा यज्जिता श्रयति भा जितविश्वपत्न्याः ।

---

16 तारकेशः (चन्द्रः) हैमवत्या मुखश्रिया जितः सन् कलङ्कितोऽभूत् । स च आत्मन्यवस्थितं कलङ्कं प्रमार्ष्टुं तदाप्रभृति ईश्वरं (शिवं) आश्रयतीति भावः ।

17 इयं तारकारातेः (चन्द्रस्य) मातुः (पार्वत्याः) मुखे द्विजाली (दन्तपङ्क्तिः) न । किं तर्हि तस्या मुखेन ओषधीशं (चन्द्रं) तारकावलीं च विजित्य बन्दीकृता द्विजाली (नक्षत्रश्रेणी) एव । सैव द्विजाली वः प्रसत्तिं (प्रमोदं) तनोतु इत्यन्वयः ।

18 मृडान्याः श्वासामोदेन त्रिद्वयाङ्घ्रयः (षट्पदाः) आकृष्टाः । अहमहमिकया प्रयुद्ध्यतां तेषां तत्सौरभ्याकुलत्वं (श्वासामोदहेतुकां व्याकुलतां) वीक्ष्य मृडान्या अस्तोकहास्यं समुद्भूतम् । तद्धास्यं च पूर्णेन्दोः चन्द्रिकासादृश्यप्राप्तेः मनसाप्यचिन्त्यरहस्यम् इति सङ्क्षिप्तार्थः ।

19 सम्भाषणावसर एव स्वस्माद् विभक्तं, हारित्वे स्वतुलामयातमपि सर्वदा उपर्यवस्थं (उच्चासनस्थितं) ओष्ठं प्रतीव सञ्जातरोषादिव रक्तिमानमानीतो देव्या अधर इति पिण्डितार्थः ।

वीणाऽऽपवादजलधेस्तरणाय शङ्के
तुम्बीफलद्वयमसौ मनसीत्यशङ्के ॥ २० ॥

कपोलौ—

कर्णावतंसीकृतमञ्जुपुष्पे
श्रियं कपोलस्थल आयताक्ष्याः ।
दत्तां चिरं वो रतिकामयोर्वा
क्रीडावने पत्रलतामनोज्ञे ॥ २१ ॥

कर्णौ—

कस्याघसङ्घं न करोति दूरं
कर्णद्वयी ग्रावधराङ्गजायाः ।
नेत्रेषुसङ्घस्य मनोभवस्य
शालेव ताटङ्कशरासनाप्ता ॥ २२ ॥

अथ नासा—

तनोतु वः कीर्तिमहार्यजायाः
सा सङ्गरान्योन्यसमुद्यतस्य ।
मदोद्धताक्षिद्विरदद्वयस्य
नासाऽऽन्तरावेदिरिवासमेषोः ॥ २३ ॥

नेत्रे—

नेत्रे वस्तनुतां प्रसादमतुलं व्याकोशनीलाम्बुज-
च्छायासारतिरस्क्रियापटुतरे कर्णान्तमालम्बिते ।
मन्ये ये धरणीधरेश्वरभुवः कन्दर्पभूमीपते-
र्जेतुं भ्रूधनुषो रिपुं प्रविततां मौर्वीद्वयीं मञ्जुलाम् ॥ २४ ॥

अथ भ्रुवौ—

भ्रुवौ पातां शश्वद्धिमगिरिसुतायास्तु भवतः
स्फुरन्नेत्राम्भोजोपरिगमधुपालीव मधुरे ।

---

20 सृष्टिकर्तुर्ब्रह्मणः पत्न्याः सरस्वत्या वीणा पुरवैरिपत्न्याः (पार्वत्याः) वाण्या जिता इति तदपवादजलधेस्तरणाय (वीणा) तुम्बीफलद्वयं धत्ते इत्यशङ्के (निर्भये) मनसि कविः शङ्कते। इह 'अशङ्के मनसि' इत्यप्रकृष्टार्थम्। 'मनसि शङ्के' इति पुनरुक्तार्थम्। यमकलोभोऽत्र निबन्धनम्।

21 अत्र द्वितीयपादे 'कपोलस्थले' इति द्विवचनान्तम्। अत्र च 'ए'कारलोपश्चिन्त्यः। 'ए'कारे सति तु छन्दोभङ्गः। अर्थस्तु विशद एव।

22 ग्रावधराङ्गजायाः (पर्वतपुत्र्याः) ताटङ्करूपशरासनयुक्ता कर्णद्वयी नेत्रेषुसघङ्स्य (नयन-शरधारिणः) मनोभवस्य शाला (गृहैकदेशः) इवेति सम्भाव्यते कविना।

23 अहार्यजायाः (पर्वतनन्दिन्याः) नासा असमेषोः (कामस्य) युद्धोद्यतयोर्मदोन्मत्तयोः अक्षिरूपद्विरदयोः अन्तरावेदिरिव भातीत्यर्थः।

24 धरणीधरेश्वरभुवः (पर्वतराजपुत्र्याः) नेत्रे कन्दर्पभूमीपते रिपुं (शिवं) जेतुं प्रविततां मञ्जुलां भ्रूधनुषः मौर्वीद्र्यीं मन्यते कविः।

अथो वा भालोद्यत्तिलकतरुमारोढुमिव किं
विनिर्याते नार्यौ श्रुतिविवरतो मारुतभुजः ॥ २५ ॥

भालम्—

कर्पूरवर्तुलमहत्तिलकाङ्कितं तद्-
भालं सुरारिमथनोद्यतघर्मबिन्दु ।
अस्या नभोऽङ्गणमिवोडुपतारकाभि-
र्युक्तं तनोतु तनुतां ननु कल्मषस्य ॥ २६ ॥

केशाः—

यत्कार्ष्ण्येन वशीकृता जलमुचो नीरं वहन्ति ध्रुवं
यद्दैर्घ्येण जिताः श्रयन्ति सकुला हालाहलं पन्नगाः ।
यत्सौन्दर्यजिता भजन्ति चमरीबाला वनान्तःस्थितिम्
आह्लादं प्रतनोतु वो गिरिभुवः सोऽयं कचानां भरः ॥ २७ ॥
आसील्लौहाभिधानाद् द्विजवरतिलकाद् वासुदेवाभिधान-
स्तत्सूनोर्भोगिनाम्नोऽभवदतुलमतिर्वेणिदत्ताभिधानः ।
सोऽयं चक्रेऽङ्ककानां शरदिजशशभृच्चारुसूक्तीः स्तुतीर्या-
स्ता भूमीमण्डले सत्सदसि परिचिताः सन्तु गोत्रेन्दुजायाः ॥ २८ ॥

इति वेणीदत्तकविरचितम्
अपर्णाखिलाङ्गवर्णनं समाप्तम् ।

---

25 हिमगिरिसुतायाः भ्रुवौ नूनं तस्याः स्फुरन्नेत्राम्भोजयोरुपरिगता भ्रमरपङ्क्तिः । अथवा तस्या भाले दृश्यमानम् ऊर्ध्वतिलकमारोढुं कर्णविवरतो विनिर्याते मारुतभुजः (भुजगस्य) नार्यौ (सर्पिण्यौ) इत्युत्प्रेक्षते कविः ।

26 सुरारिमथने (दैत्यसङ्गरे) कर्पूरवर्तुलमहत्तिलकाङ्कितम् असुरसमरजन्यघर्मबिन्दुयुतं च देव्या आननम् उडुपतारकाभिर्युक्तं नभोङ्गणमिव भातीति कवेर्विवक्षा ।

27 गिरिभुवः (पार्वत्याः) कचानां कार्ष्ण्येन जिता जलमुचः दासा इव नीरं वहन्ति । दैर्घ्येण पराभूताः पन्नगाः आत्महत्योद्यता इव हालाहलं मुखे धारयन्ति । सौन्दर्येण जिताश्च चमरीबालाः (चमर्यः) विपिनमाश्रयन्तीति निरुपमा देव्याश्चिकुराः ।